# 2022

## SANSKRIT — HONOURS

**Paper : DSE-4**

**(Veda)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

विशेषोल्लेखं विना सर्वेषां प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च प्रदातव्यम्।

**Section – A**

**Unit : I**

**(Marks : 10)**

1. अधोदत्तेषु प्रश्न**पञ्चकं** समाधेयम्। 2×5

(a) सायणपूर्वभाविनि काले अध्यात्मदिशा वेदभाष्यं विरचयतां मध्ये कस्यापि आचार्यद्वयस्य नाम विलिख्यताम्।

(b) निरुक्तग्रन्थे समुपलभ्यमानानां वेदव्याख्यातृसम्प्रदायानां मध्ये द्वितयस्य नाम समुल्लिख्यताम्।

(c) सायणाचार्यस्य आविर्भावकालः कः? तेन रचितस्य वेदभाष्यस्य नाम किम्?

(d) शुक्लयजुर्वेदीय-माध्यन्दिनशाखायाः भाष्यकारद्वयस्य नाम विलिख्यताम्।

(e) नक्षत्रपक्षे वेदं व्याख्यायतां विदुषां मध्ये कस्यचित् भारतीयस्य नाम समुल्लिख्यताम्। तत्प्रणीतस्य कस्यचन ग्रन्थस्य च नाम विलिख्यताम्।

(f) सत्यव्रतसामश्रमिपादैः सम्पादितस्य वैदिकग्रन्थद्वयस्य नामोल्लेखः कार्यः।

(g) "The Secret of the Veda" इत्ययं ग्रन्थः केन विरचितः? वेदविषयकस्य तदीय-ग्रन्थान्तरस्य कस्यचन नाम विलिख्यताम्।

**Unit : II**

**(Marks : 25)**

2. अधोदत्तयोः यथेच्छम् ***एकः*** प्रश्नः समाधेयः।

(a) क आसीत् रोहितः? कदा केन तस्मै विचरणमाहात्म्यम् उपदिष्टम्? तानि च उपदेशवचनानि समासेन उपस्थाप्यन्ताम्। 2+4+6

(b) केन क्रीतः शुनःशेपः? कति मुद्राव्ययेन स क्रीतः? कस्मिन्नेव यज्ञे पशुत्वेन शुनःशेप आनीतः? कस्य कारुण्येन स मुक्तोऽभवत्? कथं शुनःशेपेन अजीगर्तस्य पुत्रत्वं प्रत्याख्यातम्? 1+1+1+1+8

3. अधोलिखितेषु **एकः** व्याख्येयः। 8×1

(a) ऋणमस्मिन् संनयत्यमृतत्वं च गच्छति।
पिता पुत्रस्य जातस्य, पश्येच्चेज्जीवतो मुखम्।।

(b) नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम्।
पापो नृषद्वरो जन इन्द्र इच्चरतः सखा, चरैवेति।।

(c) पशुनिर्दशो भवत्यथ स मेध्यो भवति।

4. निम्नोद्धृतयोः **एकतरस्य आङ्गलभाषया वङ्गभाषया** वा अनुवादः कार्यः। 5×1

(a) तस्य ह दन्ताःपुनर्जज्ञिरे, तं होवाचाज्ञत वा अस्य पुनर्दन्ताः, यजस्व माऽनेनेति; स होवाच, यदा वै क्षत्रियः सान्नाहुको भवत्यथ स मेध्यो भवति, सन्नाहं तु प्राप्नोत्वथ त्वा यजा इति।

(b) तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः। पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत् कनीयांसः।।
तद्ये ज्यायांसो न ते कुशलं मेनिरे।ताननु व्याजहारान् तान् वः प्रजा भक्षीष्टेति। त एतेऽन्ध्राः पुण्ड्राः शवरा पुलिन्दा भूतिबा इत्युदन्त्या बहवो वैश्वामित्रा दस्यूनां भूयिष्ठाः।।

## Section - B

### Unit : I

**(Marks : 25)**

5. अधःप्रदत्तयोः **एकतरस्य** उत्तरं लेखनीयम्।

(a) तैत्तिरीयोपनिषदः कस्यां वल्ल्यां पाङ्क्तविद्या समुपदिष्टा? पाठ्यानुसारं पाङ्क्ततत्त्वं व्याख्यायताम्। 1+11

(b) कास्तावद् व्याहृतयः? तत्र चतुर्थ्याः प्रवक्ता कः? तासां व्याहृतीनां व्याख्या कार्या। 4+1+7

6. यथाभिमतम् **एकतमः** व्याख्येयः। 8×1

(a) शीक्षां व्याख्यास्यामः।

(b) वर्णः स्वरः। मात्रा बलम्। साम सन्तानः।

(c) ता महासंहिता इत्याचक्षते।

7. अधोलिखितयोः **एकतरस्य वङ्गभाषया आङ्गलभाषया** वा अनुवादः कार्यः। 5×1

(a) आवहन्ती वितन्वाना। कुर्वाणाचीरमात्मनः। वासांसि मम गावश्च। अन्नपाने चा सर्वदा। ततो मे श्रियमावह। लोमशां पशुभिः सह स्वाहा।

(b) ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु।
तद् वक्तारमवतु। अवतु माम्। अवतु वक्तारम्।

Unit : II

(Marks : 5)

**8.** अधोलिखितयोः ***एकतरस्य वङ्गभाषया आङ्गलभाषया*** वा अनुवादः करणीयः। 5×1

(a) यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने।
तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत्॥

(b) अविद्यायां बहुधा वर्तमाना
वयं कृतार्था इत्यभिमन्यन्ति बालाः।
यत्कर्मिणो न प्रवेदयन्ति रागा
त्तेनातुराः क्षीणलोकाश्च्यवन्ते॥